# शब्दानित्यत्वविचारः

अभिख्या शिवपुरम्
अनुसंधात्री, न्यायविभागः, राष्ट्रिय संस्कृत विश्वविद्यालय, तिरुपतिः, भारत

## शोधसारांश:

*अस्मिन् शोधे आकाशस्य केवलगुणस्य शब्दस्य विचारः क्रियते। तच्च वैशेषिकन्यायमतयोः उभयोः प्रतिपादितान् विषयान् अत्र विस्तरेन प्रस्तूयते।*

*सप्तपदार्थेषु अकार्षीत् सम्पूर्णजगतः विभागः। तेषु द्रव्यस्य सर्वाधारत्वेन प्राधान्यं भजते। तच्च द्रव्यं नवधा विभक्तम् – "**पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव**" इति। प्रकृते नवद्रव्येषु अन्यतमे आकाशे समवेतस्य शब्दस्य नित्यत्वानित्यत्वविचारः प्रदर्श्यते।*

## मुख्यपदानि:
शब्दः, अनित्यः, संयोगः, आदिमत्वम्, ऐन्द्रियकम्, कृतरवदुपचारात्।

## उपोद्घातः

सप्तपदार्थेषु अकार्षीत् सम्पूर्णजगतः विभागः। तेषु द्रव्यस्य सर्वाधारत्वेन प्राधान्यं भजते। तच्च द्रव्यं नवधा विभक्तम् – "**पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव**" इति तर्कसङ्ग्रहे उक्तम्। प्रकृते नवद्रव्येषु अन्यतमे आकाशे समवेतस्य शब्दस्य नित्यत्वानित्यत्वविचारः प्रदर्श्यते।

## विषयः

तत्र आकाशस्य लक्षणं तावत् – "**आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः**" इति मुक्तावल्यां कथितम् । तेन आकाशस्य शब्दैव विशेषणगुण इति ज्ञायते। तर्हि शब्दो कः चेत् – "**शब्दोऽम्बुरगुणः श्रोत्रग्राह्यः क्षणिकः कार्यकारणोभयविरोधो संयोगविभागशब्दजः प्रदेशवृत्तिः**" इति प्रशस्तपादभाष्ये निगदतम्। अर्थात् शब्दः अम्बरगुणः – आकाशस्य गुणः, श्रोत्रग्राह्यः – श्रोत्रेन्द्रियेण ग्रहणयोग्यः, क्षणिकः – द्विक्षणावस्थायित्वात् शब्दः क्षणिकः, कार्यकारणोभयविरोधः – कार्यः कारणेन च यः नष्टः भवति, संयोगविभागशब्दजः – संयोगेन विभागेन एवं शब्देन च उत्पन्नः, प्रदेशवृत्तिः – यः अव्याप्यवृत्तिश्च इति। कथं शब्दस्य प्रामाण्यं चेत् – **आप्तोपदेशः शब्दः** इति कथयन् नानाप्रकारः शब्दः इति ज्ञापितं सूत्रकारैः (गौतममहर्षिभिः)। स च शब्दः नित्यो वा अनित्यो वा इत्यत्र विचार्यते, यतो हि संशयश्च विप्रतिपत्तौ जायते अर्थात् तत्तच्छास्त्रकारैः परस्परविरुद्धप्रतिपादनादेव संशयो जायते। अत्र प्राभाकराः – "आकाशगुणः शब्दो विभुः नित्यः अभिव्यक्तिधर्मकः" इति कथयन्ति , सांख्याः – "गन्धादिसहवृत्तिर्द्रव्येषु संनिविष्टो गन्धादिवदवस्थितोऽभिव्यक्तिधर्मकः" इति, वैशेषिकाः – "आकाशगुणः शब्दः उत्पत्तिनिरोधधर्मको बुद्धिवत्" इति, बौद्धाः – "महाभूतसंक्षोभजः शब्दोऽनाश्रित उत्पत्तिधर्मको निरोधधर्मकः" इति सङ्गिरन्ति। तर्हि किमत्र तत्वम् इति प्रश्ने – "**अनित्यः शब्दः**" इति नैयायिकानां सिद्धान्तः।


©Indira Gandhi National Open University

तर्हि अस्य सैद्धान्तिकोदाहरणस्य कारणं किम् इति चेत् - **“आदिमत्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च”** इति। उत्पत्तिमत्वात् अनित्यः, इन्द्रियग्राह्यत्वात् अनित्यः, अनित्यपदार्थसदृशत्वात् अनित्यः इति त्रिभिः हेतुभिः साध्यते। प्रथमहेतुश्च आदिमत्वात् – लोके हि उत्पत्तिमन्तः घटादयः अनित्याः दृष्टाः तद्वत् संयोगविभागादिभिः उत्पन्नः शब्दोऽपि अनित्यैव इति चेत् न। तत्र शब्दः अभिव्यज्यते न तूत्पद्यते इति पूर्वपक्षिणां आक्षेपः। यथा अन्धकारे विद्यमानः पदार्थः व्यञ्जकस्य आलोकस्य सद्भावे सति अभिव्यज्यते तथा शब्दोऽपि व्यञ्जकेन भेरीदण्डसंयोगादिना अभिव्यज्यते नोत्पद्यते इति। अतः उत्पत्तिमत्वं शब्दे नास्ति तेन अनियत्वमपि न सिद्ध्यति इति।

तन्नयुक्तं, यदि शब्दः संयोगादिना अभिव्यज्यते इत्युच्यते तर्हि तत्र विकल्पद्वयं व्याचक्षते – किं यथा रुपादिकं प्रकाशदेशस्थम् अभिव्यज्यते तद्वत् संयोगादिः तत्रस्थः शब्दः अभिव्यज्यते उत भेरीदण्डसंयोगेन यः शब्दः उत्पन्नः ततः शब्दसन्ताने सति श्रोत्रप्रत्यासन्नः शब्दः गृह्यते इति। तत्र आद्ये – व्यञ्जके प्रकाशे च नष्टे व्यङ्ग्यस्य रूपस्य ग्रहणं न सम्भवति। एवं यदि संयोगादिरपि शब्दस्य व्यञ्जकः स्यात् तदा तस्मिन् नष्टे शब्दः न गृह्येत, किन्तु शब्दः गृह्यते इति न संयोगादिः अभिव्यज्यते किन्तु उत्पद्यते । द्वितीये – व्यञ्जकेन शब्देन स्वदेशस्थस्य शब्दस्य ग्रहणं नोपपद्यते यत् उत्पन्नः सन् अभिव्यक्तः सन् वा शब्दः न व्यापकः एवं श्रवणेन्द्रियमपि न व्यापकम्। किन्तु ग्रहणन्तु भवति इति श्रोत्रप्राप्तं इत्युच्यते। तत्र दूरोत्पन्नशब्दस्य प्राप्त्यभावेन श्रोत्रप्रापत्यर्थं पूर्वपूर्वशब्दात् उत्तरोत्तरशब्दानां श्रोत्रप्राप्तिपर्यन्तं उत्पत्तिः स्वीकार्यमिति। प्रथमकल्पेन उत्पत्तिमत्वं द्वितीयकल्पेन ऐन्द्रियकत्वं सिद्धम् । तेन सिद्धं शब्दस्य अनित्यत्वमपि।

ननु संयोगादेः शब्दोत्पादकत्वम् एवं श्रोत्रप्रत्यासन्नस्य शब्दस्य ग्रहणमपि सन्दिग्धमेव अतः नैव शब्दानित्यत्वं सिध्यति इत्याक्षेपे तृतीय हेतुमाचक्षते- कृतकवदुपचारादिति। यथा **“तीव्रं सुखं तीव्रं दुःखं”** इति जन्यमेव उपचर्यते इत्यतः सुखादीनां अनित्यत्वं सिद्धं तद्वत् **“तीव्रः शब्दः मन्दः शब्दः”** इत्यनेन शब्दस्यापि अनित्यत्वं सिद्धम् इति त्रिभिः हेतुभिः अभ्यदायि।

अधुना पूर्वपक्षि उक्तत्रयेषु हेतुषु व्यभिचारत्वं दर्शयति यत् अनित्यत्वाभाववति नित्यत्ववति ध्वंसे उत्पत्तिमत्वस्य सत्वात् व्यभिचारः इति। ध्वंसस्य च नित्यत्वं कथमिति प्रश्ने- यो असौ घटः विनश्यति तस्य ध्वंसस्य पुनः केनापि पदार्थेन नाशयितुं अशक्यत्वात् प्रध्वंसस्य नित्यत्वं सिद्धम् इति व्यभिचारात् शब्दानित्यत्वं न सिध्यति इति चेत् न ।

**“तत्वभाक्तयोर्नानात्वविभागादव्यभिचारः”** इति । अत्र नित्यत्वम् न तावत् ध्वंसाप्रतियोगित्वम् अपि तु **“अर्थान्तरस्याऽनुत्पत्तिधर्मकस्याऽत्महानानुपपत्तिः नित्यत्वम्”** इति। अर्थात् उत्पत्तिरहितस्य पदार्थस्य यत् स्वरूपविनाशराहित्यं तदेव नित्यत्वं वास्तविकमिति। प्रकृते प्रध्वंसस्तु न तात्वम् (वास्तविकम्) यतः प्रध्वंसस्य उत्पत्तिमत्वात् तात्विकं नित्यत्वं नोपपद्यते। अतः विनाशराहित्यात् नित्यत्वं यत् दर्शितं तत् भाक्तमेव (औपचारिकमेव) इत्याशयेन आदिमत्वरूप हेतुः अव्यभिचारः।


©Indira Gandhi National Open University

ननु ऐन्द्रियके च व्यभिचारदोषं प्रदर्शयति यत् – "येनेन्द्रियेन या व्यक्तिः गृह्यते तेनेन्द्रियेन तन्निष्ठा जाति गृह्यते" इति नियमेन – अनित्यत्वाभाववति घटत्वे (सामान्ये) ऐन्द्रियकत्वस्य सत्वात् व्यभिचारः इति चेत् न। "**सन्तानानुमानविशेषात्**" इति सूत्रेण ऐन्द्रियकत्वे विशेषणान्तरं प्रदीयते। संतानशब्दोऽत्र सामान्यवत्वपरः, अनुमानशब्दश्च ऐन्द्रियकत्वहेतुपरः, तयोः विशेषणविशेष्यभावश्च सामान्यवत्वे सति ऐन्द्रियकत्वम् इति अभिधीयते। तथा च सामान्ये ऐन्द्रियकत्वस्य सत्वेऽपि सामान्यवत्वस्य असत्वात् अव्यभिचारः। अतः अनेन हेतुनाऽपि शब्दानित्यत्वं सिद्ध्यति।

तृतीयहेतौ कृतकवदुपचारित्वहेतौ च दोषः प्रदर्श्यते – "**नित्येषु अपि अनित्यवदुपचारात्**" इति अनित्यत्वाभाववति आकाशे "आकाशस्य प्रदेशः" इति अनित्यवदुपचारस्य सत्वात् व्यभिचारः इति चेत् न। "**कारणद्रव्यस्य प्रदेशशब्देनाभिधानाद् नित्येष्वप्यव्यभिचार**" इति सूत्रेण व्यभिचारं खण्डयति। नाम "आकाशप्रदेशः" इत्यत्र आकाशादेः कारणवद् द्रव्यत्वं अवयवलक्षणम्, तत्कारणीभूतं द्रव्यं वा नाभिधीयते। यथा "कम्बलप्रदेशः" इत्यत्र कृतकस्य कम्बलस्य कारणद्रव्यमभिधीयते। अतः आकाशप्रदेशः इत्युपचारप्रयोगो गौण एव इति प्राप्ते व्यभिचारो नास्तीति शब्दस्यानित्यत्वं यदुक्तं तत् सिद्धम्।

किं च "इदमस्ति इदं नास्ति" इति "इदं नित्यं इदमनित्यं" इति कथं प्रतिपत्तव्यम् इति प्रश्ने। प्रमाणतः यदुपलभ्यते तस्य सत्वं यन्नोपलभ्यते तस्य चासत्वं प्रतिपत्तव्यं इति उत्तरति। तदा शब्दोऽपि उच्चारणात् पूर्वं तदुत्तरं च नोपलभ्यते इति **प्रागुच्चारणादनुपलब्धेरावरणादनुपलब्धेः च** इति सूत्रेण शब्दोऽपि तत्काले असन्नेवेति प्राप्तं तस्य विनाशित्वम्। ननु सन्नपि शब्दः आवरणात् नोपलभ्यते इति चेन्न, यतः येन आवरणेन सन्नपि शब्दः नोपलभ्यते इत्युच्यते तादृशावरणस्यैव अनुपलम्भात्। अर्थात् "**अनेनावृत्तः शब्दः**" इति प्रतीतिः नास्ति। अतः तादृशमावरणं किञ्चिन्नास्तीति सिद्धम्।

शब्दस्य उच्चारणं व्यञ्जकं भवति, तदभावात् प्रागुच्चारणादनुपलब्धिः अतः शब्दः नित्यः इति वक्तुं न शक्यते। उच्चारणं नाम **– "विवक्षाजनितेन कोष्ठस्य वायोः प्रेरितस्य कण्ठताल्वादिप्रतिघाताद् वर्णाभिव्यक्तिः"** इति। अत्र कण्ठादिस्थानेन वायोः यः प्रतिघातः उक्तः सः संयोगविशेष एव। संयोगस्य च शब्दव्यञ्जकत्वं पूर्वमेव प्रतिषिद्धः तस्मात् शब्दस्य अनुपलब्धिः व्यञ्जकाभावात् न किन्तु शब्दाभावप्रयुक्तैवेति, सिद्धं शब्दस्य विनाशित्वम्।

एवमेव न्यायमञ्जर्यां शब्दानित्यत्वसाधकाः हेतवः उक्ताः, ते च –

1. प्रयत्नानन्तरमुपलब्धेः कार्यः शब्दः। कार्यत्वानित्यत्वयोः परस्पराविनाभावसम्बन्धात् एकतरसिद्धौ अन्यतरसिद्धिः भवत्येवेति, उच्चारणात् लभ्यमानः शब्दः तत्कार्यः एव इति अनित्यः शब्दः।
2. "करोति" शब्दव्यपदेशाच्च कार्यः शब्दः। "शब्दं कुरू" "शब्दं मा कार्षीः" इत्यादि व्यवहाराः नानादेशेषु युगपदुपलभ्यन्ते इति शब्दस्य नानात्वं अनित्यत्वं च।
3. शब्दान्तरविकारित्वाच्च शब्दः अनित्यः। "दध्यत्र" इत्यादौ इकार एव यकारो भवति, विकारित्वात् द्राक्षेक्षुरसादिवदनित्यत्वमस्य शब्दस्येति।


©Indira Gandhi National Open University

4. वृद्धिह्रासभावाच्च अनित्यः शब्दः। कारणवृद्ध्या वर्धमानत्वात्, महाप्रयत्नैः उच्चार्यमाणः महान् गोशब्दः, अल्पप्रयत्नैः उच्चार्यमाणः अल्पः गोशब्दः। तन्तुवृद्ध्या वर्धमानः पट इव हेतुवृद्ध्या वर्धमानः कार्यो भवितुमर्हतीति।

## उपसंहारः

अनया विधया विविधग्रन्थानुसारेण शब्दस्य अनित्यत्वसाधनम् अस्मिन् शोधे प्रतिपादितं वर्तते।

## ग्रन्थसूची


1. न्यायभाष्यम् ,वात्स्यायनमुनिप्रणीतम्, सुधी प्रकाशनम्, वाराणसी, 1986।
2. प्रशस्तपादभाष्यम्, श्रीमन्महर्षिप्रशस्तदेवाचार्यविरचितम्, चौखम्भा संस्कृत संस्थान, वाराणसी।
3. न्यायसिद्धान्तमुक्तावली, श्रीविश्वनाथभट्टाचार्यविरचिता, चौखम्भा प्रकाशनम्, वाराणसी।
4. न्यायमञ्जरी, श्री जयन्तभजट्टः, प्राच्यविद्यासंशोधनालयः, मैसूरविश्वविद्यालयः, मैसूर्, 1983।



©Indira Gandhi National Open University